श्री वराह सहस्रनाम स्तोत्रं

श्री वराह सहस्रनाम स्तोत्रं

शंकर उवाच
यः पूजयेत्परात्मानं श्रीमुष्णेशं महाप्रभुं |
वराहस्य सहस्रेण नाम्नां पुष्पसहस्रकैः ||1||

हतकंटकसाम्राज्यं लभाते नात्र संशयः |
पार्वत्युवाच
किं तन्नामसहस्रं मे येन साम्राज्यमाप्नुयात् ||2||

ब्रूहि शंकर तत्प्रीत्या वराहस्य महात्मनः |
श्रुत्वा वराहमाहाम्यं न तृप्तिर्जायते क्वचित् ||3||

को नु तृप्येत तनुभृद्गुणसारविदां वर |
शंकर उवाच
शृणु देवि प्रवक्ष्यामि पवित्रं मंगलं परं ||4||

धन्यं यशस्यमायुष्यं गोप्याद्गोप्यतरं महत् |
इदं पुरा न कस्यापि प्रोक्तं गोप्यं तवापि च ||5||

तथाऽपि च प्रवक्ष्यामि मदंगार्धशरीरिणि |
सदाशिव ऋषिस्तस्य वराहो देवता स्मृतः ||6||

छंदोऽनुष्टुप् विश्वनेता कीलकं च शराग्रभृत् |
ह्रीं बीजमस्त्रं क्लींकारः कवचं श्रीमिहोच्यते ||7||

विश्वात्मा परमो मंत्रो मंत्रराजमुदीरयेत् |
हुंकारं हृदये न्यस्य वराहायेति मुर्धनि ||8||

भूर्भुवः स्वः शिखायां च नेत्रयोर्भूपतिं न्यसेत् |
सर्वज्ञाय नमोऽस्त्रं च श्रीं ह्रीं क्लिं हुं च भूमपि ||9||

हां हीं हूं हैं हौं ह इति स्वीयांगुष्ठद्वयादिकः |
एवं स्वांगकृतन्यासो मंत्रमेतमुदीरयेत् ||10||

नमः श्वेतवराहाय नमस्ते परमात्मने |
लक्ष्मीनाथाय नाथाय श्रीमुष्ण ब्रह्मणे नमः ||11||

ॐ श्रीवराहो भूवराहः परं ज्योतिः परात्परः |
परमः पुरुषः सिद्धो विभुर्व्योमचरो बली ||12||

अद्वितीयः परं ब्रह्म सच्चिदानंदविग्रहः |
निर्द्वंद्वो निरहंकारो निर्मायो निश्चयलोऽमलः ||13||

विशिखो विश्वरूपश्च विश्वदृग्विश्वभावनः |
विश्वात्मा विश्वनेता च विमलो वीर्यवर्धनः ||14||

विश्वकर्मा विनोदी च विश्वेशो विश्वमंगलः |
विश्वो वसुंधरानाथो वसुरेता विरोधहृत् ||15||

हिरण्यगर्भो हर्यश्वो दैत्यारिर्हरिसेवितः |
महातपा महादर्शो मनोज्ञो नैकसाधनः ||16||

सर्वात्मा सर्वविख्यातः सर्वसाक्षी सतां पतिः |
सर्वगः सर्वभूतात्मा सर्वदोषविवर्जितः ||17||

सर्वभूतहितोऽसंगः सत्यः सत्यव्यवस्थितः |
सत्यकर्मा सत्यपतिः सर्वसत्यप्रियो मतः ||18||

आधिव्याधिभियो हर्ता मृगांगो नियमप्रियः |
बलवीरस्तपः श्रेष्ठो गुणकर्ता गुणी बली ||19||

अनंतः प्रथमो मंत्रः सर्वभावविदव्ययः |
सहस्रनामा चानंतोऽनंतरूपो रमेश्वरः ||20||

अगाधनिलयोऽपारो निराकारो निरायुधः |
अमोघदृगमेयात्मा वेदवेद्यो विशां पतिः ||21||

विह्रतिर्विभवो भव्यो भवहीनो भवांतकः |
भक्तप्रियः पवित्रांघ्रिः सुनासः पवनार्चितः ||22||

भजनीयगुणोऽदृश्यो भद्रो भद्रयशा हरिः |
वेदांतकृद्वेदवंद्यो वेदाध्ययनतत्परः ||23||

वेदगोप्ता धर्मगोप्ता वेदमार्गप्रवर्तकः |
वेदांतवेद्यो वेदात्मा वेदातीतो जगत्प्रियः ||24||

जनार्दनो जनाध्यक्षो जगदीशो जनेश्वरः |
सहस्रबाहुः सत्यात्मा हेमांगो हेमभूषणः ||25||

हरिद(ता)श्वप्रियो नित्यो हरिः पूर्णो हलायुधः |
अंबुजाक्षोऽम्बुजाधारो निर्जरश्च निरंकुशः ||26||

निष्ठुरो नित्यसंतोषो नित्यानंदपदप्रदः |
निर्जरेशो निरालंबो निर्गुणोऽपि गुणान्वितः ||27||

महामायो महावीर्यो महातेजा मदोद्धतः |
मनोऽभिमानी मायावी मानदो मानल(र)क्षणः ||28||

मंदो मानी मनः कल्पो महाकल्पो महेश्वरः |
मायापतिर्मानपतिर्मनसः पतिरीश्वरः ||29||

अक्षोभ्यो बाह्य आनंदी अनिर्देश्योऽपराजितः |
अजोऽनंतोऽप्रमेयश्च सदानंदो जनप्रियः ||30||

अनंतगुणगंभीर उग्रकृत्परिवेष्टनः |
जितेंद्रियो जितक्रोधो जितामित्रो जयोऽजयः ||31||

सर्वारिष्टार्तिहा सर्वहृदंतरनिवासकः |
अंतरात्मा परात्मा च सर्वात्मा सर्वकारकः ||32||

गुरुः कविः किटिः कांतः कंजाक्षः खगवाहनः |
सुशर्मा वरदः शार्ङ्गी सुदासाभीष्टदः प्रभुः ||33||

झिल्लिकातनयः प्रेषी झिल्लिकामुक्तिदायकः |
गुणजित्कथितः कालः क्रोडः कोलः श्रमापहः ||34||

किटिः कृपाकरः स्वामी सर्वदृक्सर्वगोचरः |
योगाचार्यो मतो वस्तु ब्रह्मण्यो वेदसत्तमः ||35||

महालंबोष्ठकश्चैव महादेवो मनोरमः |
ऊर्ध्वबाहुरिभस्थूलः श्येनः सेनापतिः खनिः ||36||

दीर्घायुः शंकरः केशी सुतीर्थो मेघनिःस्वनः |
अहोरात्रः सूक्तवाकः सुहृन्मान्यः सुवर्चलः ||37||

सारभृत्सर्वसारश्च सर्वग्र(ग्रा)हः सदागतिः |
सूर्यश्चंद्रः कुजो ज्ञश्च देवमंत्री भृगुः शनिः ||38||

राहुः केतुर्ग्रहपतिर्यज्ञभृद्यज्ञसाधनः |
सहस्रपात्सहस्राक्षः सोमकांतः सुधाकरः ||39||

यज्ञो यज्ञपतिर्याजी यज्ञांगो यज्ञवाहनः |
यज्ञांतकृद्यज्ञगुह्यो यज्ञकृद्यज्ञसाधकः ||40||

इडागर्भः स्रवत्कर्णो यज्ञकर्मफलप्रदः |
गोपतिः श्रीपतिर्घोणस्त्रिकालज्ञः शुचिश्रवाः ||41||

शिवः शिवतरः शूरः शिवप्रेष्ठः शिवार्चितः |
शुद्धसत्त्वः सुरार्तिघ्नः क्षेत्रज्ञोऽक्षर आदिकृत् ||42||

शंखी चक्री गदी खड्गी पद्मी चंडपराक्रमः
चंडः कोलाहलः शार्ङ्गी स्वयंभूरग्र्यभुग्विभुः ||43||

सदाचारः सदारंभो दुराचारनिवर्तकः |
ज्ञानी ज्ञानप्रियोऽवज्ञो ज्ञानदोऽज्ञानदो यमी ||44||

लयोदकविहारी च सामगानप्रियो गतिः |
यज्ञमूर्तिस्त्रिलोकेशस्त्रिधामा कौस्तुभोज्ज्वलः ||46||

श्रीवत्सलांछनः श्रीमान्श्रीधरो भूधरोऽर्भकः |
वरुणो वारुणो वृक्षो वृषभो वर्धनो वरः ||47||

युगादिकृद्युगावर्तः पक्षो मास ऋतुर्युगः |
वत्सरो वत्सलो वेदः शिपिविष्टः सनातनः ||48||

इंद्रत्राता भयत्राता क्षुद्रकृत्क्षुद्रनाशनः |
महाहनुर्महाघोरो महादीप्तिर्महाव्रतः ||49||

महापादो महाकालो महाकायो महाबलः |
गंभीरघोषो गंभीरो गभीरो घुर्घुरस्वनः ||50||

ओंकारगर्भो न्यग्रोधो वषट्कारो हुताशनः |
भूयान्बहुमतो भूमा विश्वकर्मा विशांपतिः ||51||

व्यवसायोऽघमर्षश्च विदितोऽभ्युत्थितो महः |
बलबिद्बलवांदंडी वक्रदंष्ट्रो वशो वशी ||52||

सिद्धः सिद्धिप्रदः साध्यः सिद्धसंकल्प ऊर्जवान् |
धृतारिरसहायश्च सुमुखो बडवामुखः ||53||

वसुर्वसुमनाः सामशरीरो वसुधाप्रदः |
पीतांबरी वासुदेवो वामनो ज्ञानपंजरः ||54||

नित्यतृप्तो निराधारो निःसंगो निर्जितामरः |
नित्यमुक्तो नित्यवंद्यो मुक्तवंद्यो मुरांतकः ||55||

बंधको मोचको रुद्रो युद्धसेनाविमर्दनः |
प्रसारणो निषेधात्मा भिक्षुर्भिक्षुप्रियो ऋजुः ||56||

महाहंसो भिक्षुरूपी महाकंदो महाशनः |
मनोजवः कालकालः कालमृत्युः सभाजितः ||57||

प्रसन्नो निर्विभावश्च भूविदारी दुरासदः |
वसनो वासवो विश्ववासवो वासवप्रियः ||58||

सिद्धयोगी सिद्धकामः सिद्धिकामः शुभार्थवित् |
अजेयो विजयींद्रश्च विशेषज्ञो विभावसुः ||59||

ईक्षामात्रजगत्स्रष्टा भ्रूभंगनियताखिलः |
महाध्वगो दिगीशेशो मुनिमान्यो मुनीश्वरः ||60||

महाकायो वज्रकायो वरदो वायुवाहनः |
वदान्यो वज्रभेदी च मधुहृत्कलिदोषहा ||61||

वागीश्वरो वाजसनो वानस्पत्यो मनोरमः |
सुब्रह्मण्यो ब्रह्मधनो ब्रह्मण्यो ब्रह्मवर्धनः ||62||

विष्टंभी विश्वहस्तश्च विश्वाहो विश्वतोमुखः |
अतुलो वसुवेगोऽर्कः सम्राट् साम्राज्यदायकः ||63||

शक्तिप्रियः शक्तिरूपो मारशक्तिविभंजनः |
स्वतंत्रः सर्वतंत्रज्ञो मीमांसितगुणाकरः ||64||

अनिर्देश्यवपुः श्रीशो नित्यश्रीर्नित्यमंगलः |
नित्योत्सवो निजानंदो नित्यभेदी निराश्रयः ||65||

अंतश्चरो भवाधीशो ब्रह्मयोगी कलाप्रियः |
गोब्राह्मणहिताचारो जगद्धितमहाव्रतः ||66||

दुर्ध्येयश्च सदाध्येयो दुर्वासादिविबोधनः |
दुरापो दुर्धियां गोप्यो दूराद्दूरः समीपगः ||67||

वृषाकपिः कपिः कार्यः कारणः कारणक्रमः |
ज्योतिषां मथनज्योतिः ज्योतिश्चक्रप्रवर्तकः ||68||

प्रथमो मध्यमस्तारः सुतीक्ष्णोदर्ककार्यवान् |
सुरूपश्च सदावेत्ता सुमुखः सुजनप्रियः ||69||

महाव्याकरणाचार्यः शिक्षाकल्पप्रवर्तकः |
स्वच्छश्छंदोमयः स्वेच्छास्वाहितार्थविनाशनः ||70||

साहसी सर्वहंता च सम्मतोऽनिंदितोऽसकृत् |
कामरूपः कामपालः सुतीर्थ्योऽथ क्षपाकरः ||71||

ज्वाली विशालश्च परो वेदकृज्जनवर्धनः |
वेद्यो वैद्यो महावेदी वीरहा विषमो महः ||72||

ईतिभानुर्ग्रहश्चैव प्रग्रहो निग्रहोऽग्निहा |
उत्सर्गः सन्निषेधश्च सुप्रतापः प्रतापधृत् ||73||

सर्वायुधधरः शालः सुरूपः सप्रमोदनः |
चतुष्किष्कुः सप्तपादः सिंहस्कंधस्त्रिमेखलः ||74||

सुधापानरतोऽरिघ्नः सुरमेड्यः सुलोचनः |
तत्त्ववित्तत्त्वगोप्ता च परतत्त्वं प्रजागरः ||75||

ईशान ईश्वरोऽध्यक्षे महामेरुरमोघदृक् |
भेदप्रभेदवादी च स्वाद्वैतपरिनिष्ठितः ||76||

भागहारी वंशकरो निमित्तस्थो निमित्तकृत् |
नियंता नियमो यंता नंदको नंदिवर्धनः ||77||

षड्विंशको महाविष्णुर्ब्रह्मज्ञो ब्रह्मतत्परः |
वेदकृन्नाम चानंतनामा शब्दातिगः कृपः ||78||

दंभो दंभकरो दंभवंशो वंशकरो वरः |
अजनिर्जनिकर्ता च सुराध्यक्षे युगांतकः ||79||

दर्भरोमा बुधाध्यक्षे मानुकूलो मदोद्धतः |
शंतनुः शंकरः सूक्ष्मः प्रत्ययश्चंडशासनः ||80||

वृत्तनासो महाग्रीवः कुंबुग्रीवो महानृणः |
वेदव्यासो देवभूतिरंतरात्मा हृदालयः ||81||

महाभागो महास्पर्शो महामात्रो महामनाः |
महोदरो महोष्ठश्च महाजिह्वो महामुखः ||82||

पुष्करस्तुंबुरुः खेटी स्थावरः स्थितिमत्तरः |
श्वासायुधः समर्थश्च वेदार्थः सुसमाहितः ||83||

वेदशीर्षः प्रकाशात्मा प्रमोदः सामगायनः |
अंतर्भाव्यो भावितात्मा महीदासो दिवस्पतिः ||84||

महासुदर्शनो विद्वानुपहारप्रियोऽच्युतः |
अनलो द्विशफो गुप्तः शोभनो निरवग्रहः ||85||

भाषाकरो महाभर्गः सर्वदेशविभागकृत् |
कालकंठो महाकेशो लोमशः कालपूजितः ||86||

आसेवनोऽवसानात्मा बुद्ध्यात्मा रक्तलोचनः |
नारंगो नरकोद्धर्ता क्षेत्रपालो दुरिष्टहा ||87||

हुंकारगर्भो दिग्वासाः ब्रह्मेंद्राधिपतिर्बलः |
वर्चस्वी ब्रह्मवदनः क्षत्रबाहुर्विदूरगः ||88||

चतुर्थपाच्चतुष्पाच्च चतुर्वेदप्रवर्तकः |
चातुर्होत्रकृदव्यक्तः सर्ववर्णविभागकृत् ||89||

महापतिर्गृहपतिर्विद्याधीशो विशांपतिः |
अक्षरोऽधोक्षजोऽधूर्तो रक्षिता राक्षसांतकृत् ||90||

रजःसत्त्वतमोहांता कूटस्थः प्रकृतेः परः |
तीर्थकृत्तीर्थवासी च तीर्थरूपो ह्यपां पतिः ||91||

पुण्यबीजः पुराणर्षिः पवित्रः परमोत्सवः |
शुद्धिकृच्छुद्धिदः शुद्धः शुद्धसत्त्वनिरूपकः ||92||

सुप्रसन्नः शुभार्होऽथ शुभदित्सुः शुभप्रियः |
यज्ञभागभुजां मुख्यो यक्षगानप्रियो बली ||93||

समोऽथ मोदो मोदात्मा मोददो मोक्षदस्मृतिः |
परायणः प्रसादश्च लोकबंधुर्बृहस्पतिः ||94||

लीलावतारो जननविहीनो जन्मनाशनः |
महाभीमो महागर्तो महेष्वासो महोदयः ||95||

अर्जुनो भासुरः प्रख्यो विदोषो विष्टरश्रवाः |
सहस्रपात्सभाग्यश्च पुण्यपाको दुरव्ययः ||96||

कृत्यहीनो महावाग्मी महापापविनिग्रहः |
तेजोऽपहारी बलवान् सर्वदाऽरिविदूषकः ||97||

कविः कंठगतिः कोष्ठो मणिमुक्ताजलाप्लुतः |
अप्रमेयगतिः कृष्णो हंसश्चैव शुचिप्रियः ||98||

विजयींद्रः सुरेंद्रश्च वागिंद्रो वाक्पतिः प्रभुः |
तिरश्चीनगतिः शुक्लः सारग्रीवो धराधरः ||99||

प्रभातः सर्वतोभद्रो महाजंतुर्महौषधिः |
प्राणेशो वर्धकस्तीव्रप्रवेशः पर्वतोपमः ||100||

सुधासिक्तः सदस्यस्थो राजराट् दंडकांतकः |
ऊर्ध्वकेशोऽजमीढश्च पिप्पलादो बहुश्रवाः ||101||

गंधर्वोऽभ्युदितः केशी वीरपेशो विशारदः |
हिरण्यवासाः स्तब्धाक्षो ब्रह्मलालितशैशवः ||102||

पद्मगर्भो जंबुमाली सूर्यमंडलमध्यगः |
चंद्रमंडलमध्यस्थः करभागग्निसंश्रयः ||103||

अजीगर्तः शाकलाग्र्यः संधानः सिंहविक्रमः |
प्रभावात्मा जगत्कालः कालकालो बृहद्रथः ||104||

सारांगो यतमान्यश्च सत्कृतिः शुचिमंडलः |
कुमारजिद्वनेचारी सप्तकन्यामनोरमः ||105||

धूमकेतुर्महाकेतुः पक्षिकेतुः प्रजापतिः |
ऊर्ध्वरेता बलोपायो भूतावर्तः सजंगमः ||106||

रविर्वायुर्विधाता च सिद्धांतो निश्चलोऽचलः |
आस्थानकृदमेयात्माऽनुकूलश्चाधिको भुवः ||107||

ह्रस्वः पितामहोऽनर्थः कालवीर्यो वृकोदरः |
सहिष्णुः सहदेवश्च सर्वजिच्छात्रुतापनः ||108||

पांचरात्रपरो हंसी पंचभूतप्रवर्तकः |
भूरिश्रवाः शिखंडी च सुयज्ञः सत्यघोषणः ||109||

प्रगाढः प्रवणो हारी प्रमाणं प्रणवो निधिः |
महोपनिषदो वाक् च वेदनीडः किरीटधृत् ||110||

भवरोगभिषग्भावो भावसाढ्यो भवातिगः |
षड् धर्मवर्जितः केशी कार्यवित्कर्मगोचरः ||111||

यमविध्वंसनः पाशी यमिवर्गनिषेवितः |
मतंगो मेचको मेध्यो मेधावी सर्वमेलकः ||112||

मनोज्ञदृष्टिर्मारारिनिग्रहः कमलाकरः |
नमद्गणेशो गोपीडः संतानः संततिप्रदः ||113||

बहुप्रदो बलाध्यक्षे भिन्नमर्यादभेदनः |
अनिर्मुक्तश्चारुदेष्णः सत्याषाढः सुराधिपः ||114||

आवेदनीयोऽवेद्यश्च तारणस्तरुणोऽरुणः |
सर्वलक्षणलक्षण्यः सर्वलोकविलक्षणः ||115||

सर्वदक्षः सुधाधीशः शरण्यः शांतविग्रहः |
रोहिणीशो वराहश्च व्यक्ताव्यक्तस्वरूपधृत् ||116||

स्वर्गद्वारः सुखद्वारो मोक्षद्वारस्त्रिविष्टपः |
अद्वितीयः केवलश्च कैवल्यपतिरर्हणः ||117||

तालपक्षस्तालकरो यंत्री तंत्रविभेदनः |
षड्रसः कुसुमास्त्रश्च सत्यमूलफलोदयः ||118||

कला काष्ठा मुहूर्तश्च मणिबिंबो जगद्धृणिः |
अभयो रुद्रगीतश्च गुणजिद्गुणभेदनः ||119||

देवासुरविनिर्माता देवासुरनियामकः |
प्रारंभश्च विरामश्च साम्राज्याधिपतिः प्रभुः ||120||

पंडितो गहनारंभः जीवनो जीवनप्रदः |
रक्तदेवो देवमूलः वेदमूलो मनःप्रियः ||121||

विराचनः सुधाजातः स्वर्गाध्यक्षो महाकपिः |
विराड्रूपः प्रजारूपः सर्वदेवशिखामणिः ||122||

भगवान् सुमुखः स्वर्गः मंजुकेशः सुतुंदिलः |
वनमाली गंधमाली मुक्तामाल्यचलोपमः ||123||

मुक्तोऽसृप्यः सुहृद्भ्राता पिता माता परा गतिः |
सत्वध्वनिः सदाबंधुर्ब्रह्मरुद्राधिदैवतं ||124||

समात्मा सर्वदः सांख्यः सन्मार्गध्येयसत्पदः |
ससंकल्पो विकल्पश्च कर्ता स्वादी तपोधनः ||125||

विरजा विरजानाथः स्वच्छशृंगो दुरिष्टहा |
घोणो बंधुर्महाचेष्टः पुराणः पुष्करेक्षणः ||126||

अहिर्बुध्न्यो मुनिर्विष्णुर्धर्मयूपस्तमोहरः |
अग्राह्यश्शाश्वतः कृष्णः प्रवरः पक्षिवाहनः ||127||

कपिलः खपथिस्थश्च प्रद्युम्नोऽमितभोजनः |
संकर्षणो महावायुस्त्रिकालज्ञस्त्रिविक्रमः ||128||

पूर्णप्रज्ञः सुधीर्हृष्टः प्रबुद्धः शमनः सदः |
ब्रह्मांडकोटिनिर्माता माधवो मधुसूदनः ||129||

शश्वदेकप्रकारश्च कोटिब्रह्मांडनायकः |
शश्वद्भक्तपराधीनः शश्वदानंददायकः ||130||

सदानंदः सदाभासः सदा सर्वफलप्रदः |
ऋतुमानृतुपर्णश्च विश्वनेता विभूत्तमः ||131||

रुक्मांगदप्रियोऽव्यंगो महालिंगो महाकपिः |
संस्थानस्थानदः स्रष्टा जाह्नवीवाहधृक्प्रभुः ||132||

मांडुकेष्टप्रदाता च महाधन्वंतरिः क्षितिः |
सभापतिसेसिद्धमूलश्चरकादिर्महापथः ||133||

आसन्नमृत्युहंता च विश्वास्यः प्राणनायकः |
बुधो बुधेज्यो धर्मेज्यो वैकुंठपतिरिष्टदः ||134||

फलश्रुतिः -
इति श्वेतवराहस्य प्रोक्तं हे गिरिकन्यके |
समस्तभाग्यदं पुण्यं भूपतित्वप्रदायकं ||135||

महापातककोटिघ्नं राजसूयफलप्रदं |
य इदं प्रातरुत्थाय दिव्यं नामसहस्रकं ||136||

पठते नियतो भूत्वा महापापैः प्रमुच्यते |
सहस्रनामभिर्दिव्यैः प्रत्यहं तुलसीदलैः ||137||

पूजयेद्यो वराहं तु श्रद्धया निष्ठयान्वितः |
एवं सहस्रनामभिः पुष्पैर्वाथसुगंधिभिः ||138||

अभिजातकुले जातो राजा भवति निश्चितं |
एवं नामसहस्रेण वराहस्य महात्मनः ||139||

न दारिद्र्यमवाप्नोति न याति नरकं ध्रुवं |
त्रिकालमेककालं वा पठन् नामसहस्रकं ||140||

मासमेकं जपेन्मर्त्यो भविष्यति जितेंद्रियः |
महतीं श्रियमायुष्यं विद्यां चैवाधिगच्छति ||141||

यो वा श्वेतवराहस्य दिव्यैर्नामसहस्रकैः |
प्रवर्तयेन्नित्यपूजां दत्वा निर्वाहमुत्तमं ||142||

भवेज्जन्मसहस्रैस्तु साम्राज्याधिपतिर्ध्रुवं |
रात्रौ श्वेतवराहस्य सन्निधौ य इदं पठेत् ||143||

क्षयापस्मारकुष्ठाद्यैर्महारोगैस्तथाऽपरैः |
मासादेव विनिर्मुक्तः स जीवेच्छरदां शतं ||144||

सर्वेषु पुण्यकालेषु पठन्नामसहस्रकं |
सर्वपापविनिर्मुक्तो लभते शाश्वतं पदं ||145||

सहस्रनामपठनाद्वराहस्य महात्मनः |
न ग्रहोपद्रवं याति याति शत्रुक्षयं तथा ||146||

राजा च दासतां याति सर्वे यांति च मित्रतां |
श्रियश्च स्थिरतां यांति यांति सर्वेऽपि सौहृदं ||147||

राजदस्युग्रहादिभ्यो व्याध्याधिभ्यश्च किंचन |
न भयं जायते क्वापि वृद्धिस्तस्य दिने दिने ||148||

विप्रस्तु विद्यामाप्नोति क्षत्रियो विजयी भवेत् |
वार्धुष्यविभवं याति वैश्यः शूद्रः सुखं व्रजेत् ||149||

सकामः काममाप्नोति निष्कामो मोक्षमाप्नुयात् |
महाराक्षसवेतालभूतप्रेतपिशाचकाः ||150||

रोगाः सर्पविषाद्याश्च नश्यंत्यस्य प्रभावतः |
य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत् |
नामंगलमवाप्नोति सोऽमुत्रेह च मानवः ||151||

नमः श्वेतवराहाय नमस्ते परमात्मने |
लक्ष्मीनाथाय नाथाय श्रीमुष्णब्रह्मणे नमः ||152||

यः पठेच्छृणुयान्नित्यं इमं मंत्रं नगात्मजे |
स पापपाशनिर्मुक्तः प्रयाति परमां गतिं ||153||

इति श्रीवराहसहस्रनामस्तोत्रं संपूर्णं |